॥ આદિત્યદ્વાદશનામસ્તોત્રમ્ ॥

એકચક્રો રથો યસ્ય દિવ્યઃ કનકભૂષણઃ ।
સ મે ભવતુ સુપ્રીતઃ પઞ્ચહસ્તો દિવાકરઃ ॥ ૧॥

આદિત્યઃ પ્રથમં નામં દ્વિતીયં તુ દિવાકરઃ ।
તૃતીયં ભાસ્કરઃ પ્રોક્તં ચતુર્થં તુ પ્રભાકરઃ ॥ ૨॥

પઞ્ચમં તુ સહસ્રાંશુઃ ષષ્ઠં ચૈવ ત્રિલોચનઃ ।
સપ્તમં હરિદશ્વશ્ચ અષ્ટમં તુ વિભાવસુઃ ॥ ૩॥

નવમં દિનકૃત્પ્રોક્તં દશમં દ્વાદશાત્મકઃ ।
એકાદશં ત્રયીમૂર્તિર્દ્વાદશં સૂર્ય એવ ચ ॥ ૪॥

દ્વાદશાદિત્યનામાનિ પ્રાતઃકાલે પઠેન્નરઃ ।
દુઃખપ્રણાશનં ચૈવ સર્વદુઃખં ચ નશ્યતિ ॥ ૫॥

ઇતિ આદિત્યદ્વાદશનામસ્તોત્રં સમાપ્તમ્ ॥